This Question Paper consists 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

Roll No.
अनुक्रमाङ्कः

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

Code No. 60/S/A
गूढसंख्या

Set
स्तबकः **A**

# SANSKRIT VYAKARAN
# संस्कृतव्याकरणम्
# (246)

**Day and Date of Examination**
**(परीक्षादिवसः दिनाङ्कश्च)** ______________________

**Signature of two Invigilators** 1. ______________________
**(निरीक्षकयोः हस्ताक्षरम्)**

2. ______________________

**सामान्या निर्देशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।
2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।
3 वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।
4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।
5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।
6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या ।
7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।

# SANSKRIT VYAKARAN

## संस्कृतव्याकरणम्

## (246)

परीक्षासमयावधिः **(Time)** होरात्रयम् **(3 Hrs)**] [पूर्णाङ्काः **(Full Marks) : 100**

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे **[A]** भागे **10**, **[B]** भागे **10**, **[C]** भागे **10** **[D]** भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

---

**[A]** दशानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) निपातसंज्ञाविधायकं सूत्रं चिनुत ।

(क) प्रादयः (ख) उपसर्गाः क्रियायोगे

(ग) निपात एकाजनाङ् (घ) गतिश्च

(2) अयं वर्णः ह्रस्वः न भवति ।

(क) अ (ख) इ

(ग) ए (घ) उ

(3) वकारस्य उच्चारणस्थानम् अस्ति ।

(क) कण्ठः (ख) तालु

(ग) दन्तोष्ठम् (घ) मूर्धा

(4) एकः पूर्वपरयोः इति कीदृशं सूत्रम् अस्ति ?

(क) विधिसूत्रम् (ख) निषेधसूत्रम्

(ग) अधिकारसूत्रम् (घ) अतिदेशसूत्रम्

(5) मोऽनुस्वारः इति सूत्रस्य उदाहरणं विद्यते ।

(क) हरिं वन्दे (ख) त्वङ्करोषि

(ग) मध्वरिः (घ) सच्चित्

(6) श्रीशः इत्यत्र कः सन्धिः अस्ति ?

(क) गुणः (ख) सवर्णदीर्घः

(ग) वृद्धिः (घ) यण्

(7) सुडनपुंसकस्य इति सूत्रं भवति ।

(क) विधिसूत्रम् (ख) अधिकारसूत्रम्

(ग) संज्ञासूत्रम् (घ) अतिदेशसूत्रम्

(8) सम्बोधनैकवचने गोरीशब्दस्य रूपं भवति ।

(क) गौरीः (ख) गौरी

(ग) गौरि (घ) गौरीम्

(9) हरिः वैकुण्ठम् अधिशेते अत्र द्वितीया केन सूत्रेण भवति ?

(क) अधिशीङ्स्थासां कर्म (ख) कर्तुरीप्सिततमं कर्म

(ग) तथायुक्तं चानीप्सितम् (घ) कर्मणि द्वितीया

(10) अनभिहिते सम्प्रदाने का विभक्तिः भवति ?

(क) प्रथमा (ख) चतुर्थी

(ग) पञ्चमी (घ) सप्तमी

**[B]** दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत । **2×10=20**

(1) अचश्च इति परिभाषायाः अर्थं विलिख्य एकं प्रवृत्तिस्थलं लिखत । 1+1

(2) अनुनासिकसंज्ञाविधायकं सूत्रं विलिख्य तस्य अर्थं लिखत । 1+1

(3) ढ्रलोपे पूर्वस्य दीर्घोऽणः इति सूत्रस्य अर्थम् उदाहरणं च लिखत । 1+1

(4) अघो याति इत्यत्र यलोपविधायकं सूत्रं विलिख्य तस्य अर्थं लिखन्तु । 1+1

(5) आतो धातोः इति सूत्रस्य अर्थम् उदाहरणं च लिखत । 1+1

(6) हे हरे इत्यत्र गुणविधायकं सूत्रं विलिख्य तस्य अर्थं लिखन्तु । 1+1

(7) उक्ते कर्मणि का विभक्तिः भवति इति विलिख्य अनुक्ते कर्मणि का विभक्तिः भवति इति लिखत । 1+1

(8) सहयुक्तेऽप्रधाने इति सूत्रस्य अर्थम् उदाहरणं च वर्णयत । 1+1

(9) निष्ठासंज्ञाविधायकं सूत्रं विलिख्य तस्य अर्थं लिखत । 1+1

(10) चरेष्टः इति सूत्रस्य अर्थम् उदाहरणं च लिख । 1+1

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) प्रादयः, मिदचोऽन्त्यात्परः इत्यनयोः सूत्रयोः कस्यचिदेकस्य सोदाहरणं व्याख्यां लिखत ।

(2) चादयोऽसत्त्वे, अदेङ् गुणः इत्यनयोः सूत्रयोः कस्यचिदेकस्य सोदाहरणं व्याख्यां प्रतिपादयत ।

(3) शिवो वन्द्यः, प्राच्छेति इत्यनयोरेकं रूपं ससूत्रं साधयत ।

(4) देवा इह, विष्णूदयः इत्यनयोरेकं रूपं ससूत्रं साधयत ।

(5) अतोऽम्, अतो गुणे इत्यनयोः सूत्रयोः कस्यचिदेकस्य सोदाहरणं व्याख्यां लिखत ।

(6) हरिणा, ज्ञाने इत्यनयोः प्रयोगयोः कस्यचिदेकस्य प्रयोगस्य सिद्धिप्रक्रियां वर्णयत ।

(7) रावणः रामाय क्रुध्यति, गोपः अजां ग्रामं नयति इत्यनयोः वाक्ययोः कस्यचिदेकस्य वाक्यस्य सिद्धिं लिखन्तु ।

(8) कृष्णेन गवां दोहः, गोपः गां पयः दोग्धि इत्यनयोः वाक्ययोः कस्यचिदेकस्य वाक्यस्य सिद्धिं दर्शयन्तु ।

(9) स्नातम्, कारकः इत्यनयोः प्रयोगयोः कस्यचिदेकस्य प्रयोगस्य सिद्धिप्रक्रियां प्रदर्शयत ।

(10) आतोऽनुपसर्गे कः, गेहे कः इत्यनयोः सूत्रयोः कस्यचिदेकस्य सूत्रस्य व्याख्यां लिखत ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) स्थानेऽन्तरतमः इति सूत्रस्य अथवा अणुदित्सवर्णस्य चाप्रत्ययः इति सूत्रस्य सोदाहरणं व्याख्यां लिखत ।

(2) यरोऽनुनासिकेऽनुनासिको वा इति सूत्रस्य अथवा मोऽनुस्वारः इति सूत्रस्य सोदाहरणं व्याख्यां लिखन्तु ।

(3) कृत्तद्धितसमासाश्च इति सूत्रस्य अथवा आमि सर्वनाम्नः सुट् इति सूत्रस्य सोदाहरणं व्याख्यां कुरुत ।

(4) ओसि च, इति सूत्रस्य अथवा आदेशप्रत्यययोः इति सूत्रस्य सोदाहरणं व्याख्यां कुर्वन्तु ।

(5) कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रस्य अथवा कर्तृकर्मणोः कृति इति सूत्रस्य सोदाहरणं व्याख्यां कुरुत ।

---